क्रत्वर्थः, पुरुषाय यः, स पुरुषार्थः। जिज्ञासाशब्दोऽपि तत एव समधिगतः,—ज्ञातुमिच्छा जिज्ञासा—इति। तदेतत् प्रतिज्ञासूत्रम्,—'क्रत्वर्थपुरुषार्थयोर्जिज्ञासा"—इति" ।(४।१।१) शवरभाष्यम्

"यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वात्" सू०२।

"अथ किंलक्षणः क्रत्वर्थः, किंलक्षणः पुरुषार्थः इति लक्षणं वाच्यं, तथा हि लघीयसी प्रतिपत्तिः, उपदेशे गरीयसी तदुच्यते,—यस्मिन् प्रीतिः पुरुषस्य, (यस्मिन्कृते पदार्थे पुरुषस्य प्रीतिर्भवति) स पुरुषार्थः पदार्थः। कुतः?। तस्य लिप्सा अर्थेन च भवति, न शास्त्रेण, क्रत्वर्थो हि शास्त्रात् अवगम्यते, न अन्यथा, अविभक्तो हि पुरुषार्थः प्रीत्या, यो यः प्रीतिसाधनः स पुरुषार्थः। पुरुषार्थे लक्षिते तद्विपरीतः क्रत्वर्थः—इति क्रत्वर्थस्य लक्षणं सिद्धम् (१वर्णकम्)।

एवं वा सूत्रं वर्ण्यते,—दर्शपूर्णमासयोराम्नायते,—'अनतिदृश्नं स्तृणाति अनतिदृश्नमेवैनं प्रजया पशुभिः करोति, इति तथा आहार्यपुरीषां पशुकामस्य वेदिं कुर्यात्, वत्सजानुम् पशुकामस्य वेदिं कुर्यात्, गोदोहनेन पशुकामस्य प्रणयेत्'—इत्येवमादीति। तत्र संशयः,—किम् एवञ्जातीयकाः क्रत्वर्थाः उत पुरुषार्थाः—इति। किं प्राप्तम्—क्रत्वर्थाः इति। कुतः? प्रत्यक्ष उपकारस्तेभ्यो दृश्यते क्रतोः, पुरीषहरणं वेदिस्तरणं च, तदुक्तं, (३।१।३सू०) 'द्रव्यगुणसंस्कारेषु बादरिः'—इति। तस्मात् क्रत्वर्थाः—एवं प्राप्ते ब्रूमः,—यस्मिन् प्रीतिः पुरुषस्य स पुरुषार्थ एव इति, प्रीतिस्तेभ्यो निर्वर्त्यते, तस्मात् एते पुरुषार्थाः-इति। 'ननु प्रत्यक्षः उपकारः क्रतोर्दृश्यते—इत्युक्तम्'। उच्यते-सत्यं दृश्यते, न तु क्रतोरुपकाराय एभ्यः सङ्कीर्त्तितेभ्यः, फलेभ्य एते श्रूयन्ते, न च य उपकरोति स शेषः, यस्तु यदर्थः श्रूयते, स तस्य शेषः—इत्युक्तं(३।१।२ सू०)'शेषः परार्थत्वात्'—इति। (२वर्णकम्)

एवं वा, द्रव्यार्जनम् उदाहरणम्, इह द्रव्यार्जनं तैस्तैर्नियमैः श्रूयते, ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना। तत्र सन्देहः,-किं क्रत्वर्थो द्रव्यपरिग्रहः उत पुरुषार्थ इति। किं प्राप्तम् क्रत्वर्थो नियमात्, यद्येष पुरुषार्थः स्यात्, नियमोऽनर्थको भवेत्, प्रत्यक्षेण एतत् अवगम्यते,—नियमादनियमाच्चार्जितं द्रव्यं पुरुषं प्रीणयति—इति, तस्मात् क्रत्वर्थः

कामश्रुतिभिश्चास्य सहैकवाक्यता दृष्टा, इतरथा, अनुमेयेन फलवाक्येन सहैकवाक्यतां यायात्। लिङ्गं चापि भवति,—'अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्, यस्याहिताग्नेः सतोऽग्निर्गृहान् दहेत्, यस्य हिरण्यं नश्येदाग्नेयादीनि निर्वपेत्—इत्येवमादि तद्धि द्रव्योपघाते चोद्यते यदि द्रव्यपरिग्रहः कर्मार्थः, तत्र एतदपि सति सम्बन्धे कर्मार्थम्—इत्युच्यते इतरथा असति सम्बन्धे कर्मार्थम्—इत्यनुमीयते फलं च अस्य कल्प्येत। तस्मात् यजतिश्रुतिगृहीतं द्रव्यार्जनं येन विना यागो न निर्वर्त्यते, स यागस्य श्रुत्या परिगृहीतः—इति गम्यते। तस्मात् क्रत्वर्थः—इति।

एवं प्राप्ते ब्रूमः,-पुरुषार्थः—इति। यस्मिन् कृते पदार्थे प्रीतिः पुरुषस्य भवति तस्मात् अस्य लिप्सा अर्थलक्षणा शरीरधारणार्था यस्य शरीरं ध्रियते व्यक्तं तस्यास्ति द्रव्यं शरीरिणां यागः श्रूयते तस्मात् विद्यमानद्रव्यस्य विनियोग उच्यते। न द्रव्यार्जनं श्रुतिगृहीतं विनापि हि द्रव्यार्जनवचनत्वेन धनदस्य यागो निर्वर्त्त्यत एव, तस्मात् पुरुषार्थो द्रव्यपरिग्रहः।

अपि च, यदि शास्त्रात् कर्मार्थं द्रव्यार्जनं, तन्नान्यत्र विनियुज्येत तथार्जितम्, तत्र सर्वतन्त्रपरिलोपः स्यात्। अपि च उपक्रान्तानि सर्वकर्माणि द्रव्यार्जनेन भवेयुः, तत्र एतन्नोपपद्यते,—अपि वा एष सुवर्गाल्लोकाच्छिद्यते, यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वा अतिपातयेत्'—इति एवञ्च सति प्रयोगकालाद्बहिरेतदङ्गं सदनुपकारकं स्यात्। न च आधानवत् भवितुमर्हति, तत्र हि वचनं—वसन्तेऽग्निमादधीत—इति न चैतत् अङ्गम्। अथ यदुक्तं—नियमवचनम् अनर्थकं पुरुषार्थे द्रव्यपरिग्रहे सति-इति। उच्यते, नैतावता पुरुषार्थता व्यावर्त्त्यते प्रत्यक्षा हि सा, त्वया च परोक्षा युक्तिबुद्ध्या व्यपदिश्यते, न च परोक्षं प्रत्यक्षस्य बाधकं भवति, तस्मात् नियमवचनात् काममपरमदृष्टं कल्प्येत न तु दृष्टहानम् तस्मात् यत् पुरुषस्य प्रयोजनं प्रीतिः तदर्थं धनस्य अर्जनम्-इत्येवं च सति व्रीहिणा यागः कर्त्तव्यः प्रीत्यर्थमर्जितेन वा क्रत्वर्थमर्जितेन वा न अत्र कश्चित् विशेषः प्रीत्यर्थम् उपार्जितोऽपि व्रीहिः व्रीहिरेव, कर्मार्थम् उपार्जितोऽपि व्रीहिः व्रीहिरेव। तस्मात् न प्रयोगचोदनागृहीतं द्रव्यार्जनम्। अथ यदुक्तम्-अनुमेयेनादृष्टेन वा शब्देन युगपत्पक्षे नियमस्य एकवाक्यता, इत्यत्र